## ।। अथ एकचत्वारिंशोऽध्यायः ।। Chapter-41

वसिष्ठ उवाच – ततो गच्छेन्नृपश्रेष्ठ काश्यपेश्वरमंतत: ।।
यस्मा [1]चैनेननश्यं [illegible]ति विषरोगा: शरीरिणाम् ।। १

कश्यपस्य[2]कुले जातो पुराभूत्काश्यपो मुनि: ।।
श्रीमाले वसतस्यस्य सर्पदष्टा मृता: सुता: ।। २

तेन तस्याभवद्दु:खं तपसोऽर्पितचेतस: ।।
स कदाचित्तपोनिष्ठश्चिंतयामास भूमिप ।। ३

सद्गति: सर्पदष्टानां नास्ति लोके नृणामिति ।।
तस्मादुग्रं तपस्तप्त्वा परितोष्य महेश्वरम् ।। ४

विषापहारिणीं विद्यां प्रार्थयिष्ये जगद्धिताम् ।।
इति कृत्वा मतिं विद्वान् काश्यप: कश्यपाश्रमात् ।। ५

शुचिप्रदेशमासाद्य स्थितस्तपसि निश्चत: ।।
जलं त्रिकालमाप्लुत्य प्राणायामपरो मुनि: ।। ६

एकांतरोपवासी च पारणे शीर्णपत्रभुक् ।।
एवं शुश्रूषमाणस्य तस्यां[3] तेवासिनो नृप ।। ७

–०–

१ ए यस्यार्चननश्यं

२ ए कश्यपस्य

३ ए तस्यां

प्राप्ते वर्षशते पूर्णे प्रत्यक्षोऽभून् महेश्वरः ।।
उदतिष्ठत् पुरो राजन् लिंगं पाप प्रणाशनम् । ८

जलदस्वनगंभीर खेन च वागभ्यवर्तत ।।
वरं वरय यत्तेऽस्ति मनसः[2] कांक्षितं चिरात् ।। ९

दास्यामि तन्न संदेहस्तपसानेन तोषितः ।।
काश्यप उवाचः- तुष्टस्त्वमसि चेदीश दाता मे वांछितं भवान् ।। १०

विषापहारिणीं विद्यां तन्ममर्पय[1] शंकर ।।
वागुवाच :- निशामय द्विजश्रेष्ठ स्वाप्ने दातास्मि दुर्लभम् । ११

मंत्रं तत्स्मरणादेव विषं नश्यति तत्क्षणात् ।।
मयावै येन मंत्रेण कृतं हालाहलं गले ।। १२

मथ्यमाने महांभोधौ परित्रातुं जगत्त्रयम् ।।
यदि दष्टा स्वयं शेषो वासुकिर्वाथ तक्षकः ।। १३

तथाप्यनेन मंत्रेण विषनाशो भविष्यति ।।
एतां विद्यां न जानाति बृहस्पतिरपि स्वयम् ।। १४

-०-

श्लोक श्लोक

१ ए तन्मामर्पय २ ए मनसोकांक्षितं

अन्यस्मै प्रददानस्त्वं भस्मसाद्[2] वै भविष्यसि ।।
लोके लिंगमिदं दिव्यं श्रद्धया योऽर्चयिष्यति ।। १५

भविष्यति कुले तस्य न जातु विषतो भयम् ।।
इत्युक्त्वा विरता वाणी व्योम्नि दिव्या महीपते ।। १६

उपस्कारं विधायाशु सौमनस्येव भारती ।।
ततो हृष्टमना विद्वान् काश्यपो मुनिपुंगव : ।। १७

स्वप्नांते शांभवं मंत्रमन्यैरप्राप्यमाप्यवान् ।।
तदाप्रभृति तत्रैव विख्यात: काश्यपेश्वर: ।। १८

यं दृष्ट्वा मानवा: सम्यक् विषरोगैर्न[1] बाध्यते ।।
इमं श्रृणोति यो भक्त्या काश्यपेश्वरसंभवम् ।। १९

नतस्यापि विषं बाधां करोति नृपते क्वचित् ।।

इति श्री श्रीमालमाहात्म्ये काश्यपेश्वर
महात्म्य नामैक चत्वारिंशोऽध्याय: ।। ४१ ।।

श्लोक श्लोक

१ ए रोगैर्न
२ ए भस्मसात्वं